दिनाङ्क :-07.03.2025

प्रात: - 06:55

अथ वार्ताः

प्रधानमन्त्रिणः यात्राद्वयम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रभृति गुजरातस्य समीपस्थस्य केन्द्रशासितप्रदेशस्य दादरानगरहवेली इत्येतस्य द्विदिवसीययात्रायां याति। श्रीमोदी स्वयात्राप्रवासे केन्द्रशासितप्रदेशे एतस्मिन् एकस्य चिकित्सालयस्य उद्घाटनम् अथ च विविधपरियोजनानां शुभारम्भं विधास्यति तदनु प्रधानमन्त्री श्वः अन्ताराष्ट्रियमहिलादिवसावसरे नवसारीस्थले 'लखपतिदीदी' इत्यमुं सम्मेलनम् सम्बोधयिष्यति। श्रीमोदी अद्य प्रातःकाले दादरा-नगर-हवेली-इत्येतस्य सिलवासानगरं प्राप्स्यति तथा च सार्धचतुश्शत-शयनासनयुतस्य नमो इत्याख्यस्य चिकित्सालयस्य उद्घाटनं करिष्यति। तत्रासौ सप्ताशीत्यधिक- पञ्चशतोत्तर-द्विसहस्रकोटि-रूपयकाणां द्विषष्टि-परियोजनानाम् उद्घाटनं शिलान्यासं च विधातुं सायलीक्रीडाङ्गणं प्रति यास्यति। यत्र श्रीमोदी एकां जनसभां सम्बोधयिष्यति। प्रधानमन्त्री अद्य सायंकाले सूरत-खाद्य-सुरक्षा-संतृप्ति-इत्यभिनामधेयके अभियाने सहभागं करिष्यति ततः परम् असौ प्रधानमन्त्री-गरीब-कल्याणान्न-योजनायाः अन्तर्गतं प्रायशः द्विलक्षसङ्ख्यकेभ्य लाभार्थिभ्यः लाभान् वितरिष्यति।

प्रधानमन्त्रिणः सर्वकारीयेतवाहिन्यां वार्ताः

प्रधानमन्त्रिणा नरेन्द्रमोदिना निगदितं यत् भारतेन प्राप्तोपलब्धयः सफलताश्च सकले हि विश्वे आशायाः नवीनतरङ्गं जनयन्ति। असौ अवदत् यत् अद्य समग्रविश्वं कथयति यत् अयहि भारतस्य युगो वर्तते इति। नवदिल्ल्यां एकया सर्वकारीयेतर-वार्ता-वाहिन्या आयोजितं कार्यक्रमं सम्बोयन् श्रीमोदी प्रत्यपादयत् यत् भारतम् अद्य वैश्विकविकासाय गतिं प्रददाति अथ च विकासपथे नरैन्तर्येण जवीयगत्या वर्धमानं विद्यते। असौ अग्रे प्रावोचत् यत् विगतैकदशके भारतं पञ्चमी बृहत्तमार्थव्यवस्था जातम् तृतीयां च बृहत्तमाम् अर्थव्यवस्थां भवितुं तीव्रगत्या अग्रे गच्छदस्ति।सः अवदत् यत् सौरशक्तिसामर्थ्ये भारतं पञ्चसु प्रमुखेषु देशेषु अन्यतमम् अस्ति।

अश्विनी वार्ताः

केन्द्रीय-वैद्युत्कीय-सूचनाप्रसारण-मन्त्री अश्विनीवैष्णवः प्रतिपादितवान् यत् आगामिषु त्रिषु चतुर्षु च वर्षेषु भारतं स्वस्य ग्राफिक्स-प्रोसेसिंग-यूनिट इति विकसितं करिष्यति। असौ अग्रे अवोचत् यत् भारतस्य ए.आई. मॉडल-कम्प्यूटेशन जी.पी.यू इत्येतस्य मूल्यं विश्वे न्यूनतममस्ति यद्धि चत्वारिंशत्प्रतिशतं सर्वकारीयानुदानस्य अनन्तरं प्रायशः सप्तषष्टि रुप्यकाणि प्रतिहोरां यावदस्ति नवदिल्ल्यां कृत्रिमबुद्धिमत्तयाः ए.आई.-इत्येतया सम्बद्धानां कोषान्तर्जाल पटल-पदक्षेपाणां शुभारम्भं श्रीवैष्णवः कृतवान्।

## प्रधानमन्त्रिणः जनौषधिः

अद्य जनौषधिदिवसो वर्तते। अयं दिवसः योजनायाः विषये जागरूकतासंवर्धनाय जेनेरिक्-इत्येतासाम् औषधिनाम उपयोगाय च आचर्यते। सर्वेभ्यः सुलभमूल्ये गुणवत्तायुतानि जेनेरिक्-इत्येतानि औषधानि उपलब्धयितुं प्रधानमन्त्री भारतीय-जनौषधि परियोजनायाः लक्ष्यं वर्तते यत् गुणवत्तापूर्वकानि एतानि औषधानि सुलभाल्प-मूल्ययोः उपलभ्यन्ते इति।

## जनजातीय-युव-विनिमय-कार्यक्रमः

केन्द्रीय-गृहविषयक-राज्यमन्त्री नित्यानन्द-रायः ह्यः नवदिल्ल्यां जनजातीय-युव-विनिमय-कार्यक्रमस्य टी. वाई. ई. पी. इत्यस्य अन्तर्गतं प्रायशः द्विशत संख्यकैः जनजातीय-युवभिः सह वार्तालापम् अकरोत्। छत्तीसगढ-ओडिशा-राज्ययोः आदिवासि-जनपदयोः एते युवानः सम्प्रति राष्ट्रिय-राजधान्यां भ्रमणं कुर्वन्तः सन्ति। एतैः जनजातीय-युवकैः सह संवादं कुर्वता केन्द्रीयमन्त्रिणा उक्तं यत् देशस्य वामपक्षोग्रवादप्रभावित-जनपदेषु बहूनि विकासकार्याणि विहितानि सन्ति। अपि च मार्गाणां रेल-मार्गाणां च जालस्य विकासः जातः अपरत्र एतेषु जनपदेषु नूतनविद्यालयाः उद्घाटिताः च।

## क्रिकेट

वीमेन्स-प्रीमीयर-लीग-इत्येतस्यां क्रिकेट्-मालिकायां ह्यः रात्रौ लखनऊनगरे भारतरत्न-श्री-अटल-बिहारी-वाजपेयी-एकाना-क्रिकेट्-क्रीडाङ्गणे मुम्बई-इण्डियन्स-दलेन यूपी-वॉरियर्स-इत्येद्दलं षड्क्रीडकानां हानिपुरस्सरं पराजितम्। अद्य लखनऊ-नगरैव गुजरात-जायन्ट्स-डेल्ही- कैपिटल्स-दलयोः मध्ये द्वन्द्वं भविष्यति।

॥ इति वार्ता:॥